# श्रीरामस्तोत्रम्

आपदामपहर्तारं दातारं सर्वसम्पदाम्
लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम् || १ ||

आर्तानामार्तिहन्तारं भीतानां भीतिनाशनम्
द्विषतां कालदण्डं तं रामचन्द्रं नमाम्यहम् || २ ||

नमः कोदण्डहस्ताय सन्धीकृतशराय च
खण्डिताखिलदैत्याय रामायाऽऽपन्निवारिणे || ३ ||

रामाय रामभद्राय रामचन्द्राय वेधसे
रघुनाथाय नाथाय सीतायाः पतये नमः || ४ ||

अग्रतः पृष्ठतश्चैव पार्श्वतश्च महाबलौ
आकर्णपूर्णधन्वानौ रक्षेतां रामलक्ष्मणौ || ५ ||

सन्नद्धः कवची खड्गी चापबाणधरो युवा
गच्छन् ममाग्रतो नित्यं रामः पातु सलक्ष्मणः || ६ ||

अच्युतानन्तगोविन्द नामोच्चारणभेषजात्
नश्यन्ति सकला रोगास्सत्यं सत्यं वदाम्यहम् || ७ ||

सत्यं सत्यं पुनस्सत्यमुद्धृत्य भुजमुच्यते
वेदाच्छास्त्रं परं नास्ति न दैवं केशवात्परम् || ८ ||

शरीरे जर्झरीभूते व्याधिग्रस्ते कळेबरे
औषधं जाह्नवीतोयं वैद्यो नारायणो हरिः || ९ ||

आलोड्य सर्वशास्त्राणि विचार्य च पुनः पुनः
इदमेकं सुनिष्पन्नं ध्येयो नारायणो हरिः || १० ||

कायेन वाचा मनसेन्द्रियैर्वा
बुध्यात्मना वा प्रकृतेः स्वभावात्

करोमि यद्यत् सकलं परस्मै
नारायणायेति समर्पयामि || ११ ||

यदक्षरपदभ्रष्टं मात्राहीनं तु यद्भवेत्
तत्सर्वं क्षम्यतां देव नारायण नमोऽस्तु ते || १२ ||

विसर्गबिन्दुमात्राणि पदपादाक्षराणि च
न्यूनानि चातिरिक्तानि क्षमस्व पुरुषोत्तम || १३ ||

|| इति श्रीरामस्तोत्रं सम्पूर्णम् ||